শ্ৰীঃ

শ্ৰীমতে রামানুজায নমঃ

শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

শ্ৰীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্ৰীরামচন্দ্র পরব্রহ্মণে নমঃ

## শ্ৰীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ষষ্ঠঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্ৰী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষষ্ঠঃ সর্গঃ ॥

## কর্তৱ্যনির্ণযায মন্ত্রিণঃ প্রতি সমুচিতসম্মতিদানার্থং রাৱণস্যানুরোধঃ

লঙ্কাযাং তু কৃতং কর্ম ঘোরং দৃষ্টৱা ভযাৱহম্।
রাক্ষসেন্দ্রো হনুমতা শক্রেণেৱ মহাত্মনা।
অব্রৱীদ্ রাক্ষসান্ সর্ৱান্ হ্রিযা কিঞ্চিদৱাঙ্মুখঃ॥ **6.6.1** ॥

ধর্ষিতা চ প্রৱিষ্টা চ লঙ্কা দুষ্প্রসহা পুরী।
তেন ৱানরমাত্রেণ দৃষ্টা সীতা চ জানকী॥ **6.6.2** ॥

প্রাসাদো ধর্ষিতশ্চৈত্যঃ প্রৱরা রাক্ষসা হতাঃ।
আৱিলা চ পুরী লঙ্কা সর্ৱা হনুমতা কৃতা॥ **6.6.3** ॥

কিং করিষ্যামি ভদ্রং ৱঃ কিং ৱো যুক্তমনন্তরম্।
উচ্যতাং নঃ সমর্থং যৎ কৃতং চ সুকৃতং ভৱেৎ॥ **6.6.4** ॥

মন্ত্রমূলং চ ৱিজযং প্রৱদন্তি মনস্ৱিনঃ।
তস্মাদ্ ৱৈ রোচযে মন্ত্রং রামং প্রতি মহাবলাঃ॥ **6.6.5** ॥

ত্রিৱিধাঃ পুরুষা লোকে উত্তমাধমমধ্যমাঃ।
তেষাং তু সমৱেতানাং গুণদোষৌ ৱদাম্যহম্॥ **6.6.6** ॥

মন্ত্রস্ত্রিভির্হি সংযুক্তঃ সমর্থৈর্মন্ত্রনির্ণযে।
মিত্রৈর্ৱাপি সমানার্থৈর্বান্ধৱৈরপি ৱাধিকৈঃ॥ **6.6.7** ॥

সহিতো মন্ত্রযিৎৱা যঃ কর্মারম্ভান্ প্রৱর্তযেৎ।
দৈৱে চ কুরুতে যত্নং তমাহুঃ পুরুষোত্তমম্॥ **6.6.8**॥

একোঽর্থং ৱিমৃশেদেকো ধর্মে প্রকুরুতে মনঃ।
একঃ কার্যাণি কুরুতে তমাহুর্মধ্যমং নরম্॥ **6.6.9**॥

গুণদোষৌ ন নিশ্চিত্য ত্যকত্বা দৈৱব্যপাশ্রযম্।
করিষ্যামীতি যঃ কার্যমুপেক্ষেৎ স নরাধমঃ॥ **6.6.10**॥

যথেমে পুরুষা নিত্যমুত্তমাধমমধ্যমাঃ।
এৱং মন্ত্রোঽপি ৱিজ্ঞেয উত্তমাধমমধ্যমঃ॥ **6.6.11**॥

ঐকমত্যমুপাগম্য শাস্ত্রদৃষ্টেন চক্ষুষা।
মন্ত্রিণো যত্র নিরতাস্তমাহুর্মন্ত্রমুত্তমম্॥ **6.6.12**॥

বহ্ৱীরপি মতীর্গৎৱা মন্ত্রিণামর্থনির্ণযঃ।
পুনর্যত্রৈকতাং প্রাপ্তঃ স মন্ত্রো মধ্যমঃ স্মৃতঃ॥ **6.6.13**॥

অন্যোন্যমতিমাস্থায যত্র সম্প্রতিভাষ্যতে।
ন চৈকমত্যে শ্রেযোঽস্তি মন্ত্রঃ সোঽধম উচ্যতে॥ **6.6.14**॥

তস্মাৎ সুমন্ত্রিতং সাধু ভৱন্তো মতিসত্তমাঃ।
কার্যং সম্প্রতিপদ্যন্তমেতৎ কৃত্যং মতং মম॥ **6.6.15**॥

ৱানরাণাং হি ধীরাণাং সহস্রৈঃ পরিৱারিতঃ।
রামোঽভ্যেতি পুরীং লঙ্কামস্মাকমুপরোধকঃ॥ **6.6.16**॥

তরিষ্যতি চ সুৱ্যক্তং রাঘৱঃ সাগরং সুখম্।
তরসা যুক্তরূপেণ সানুজঃ সবলানুগঃ॥ **6.6.17**॥

সমুদ্রমুচ্ছোষযতি ৱীর্যেণান্যৎকরোতি ৱা।
তস্মিন্নেৱংৱিধে কার্যে ৱিরুদ্ধে ৱানরৈঃ সহ।
হিতং পুরে চ সৈন্যে চ সর্ৱং সম্মন্ত্র্যতাং মম॥ **6.6.18**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ষষ্ঠঃ সর্গঃ॥